## अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः (४६/२११३)

अतिक्रम्य ग्रहः अतिग्रहः। अचलनमव्यथनम्। क्षेपो निन्दा। अतिग्रहादिविषये या तृतीया तदन्ताद्[1] वा तसिः प्रत्ययो भवति, सा चेत् कर्तरि न भवति। [2]वृत्तेनातिगृह्यते वृत्ततोऽतिगृह्यते। [3]चारित्रेणातिगृह्यते चारित्रतोऽतिगृह्यते। [4]सुष्ठुवृत्तवान् अन्यानतिक्रम्य [5]वृत्तेन गृह्यते इत्यर्थः। अव्यथने – वृत्तेन न व्यथते वृत्ततो न व्यथते। [6]चारित्रेण न व्यथते चारित्रतो न व्यथते। वृत्तेन न चलति इत्यर्थः। क्षेपे – वृत्तेन क्षिप्तो वृत्ततः क्षिप्तः। चारित्रेण क्षिप्तः चारित्रतः क्षिप्तः। वृत्तेन निन्दितः इत्यर्थः। अकर्तरि इति किम्? देवदत्तेन क्षिप्तः[7]॥

## हीयमानपापयोगाच्च। (४७/२११४)

'अकर्तरि तृतीयायाः' (५.४.४६/२११३) इत्येव। हीयमानेन पापेन च योगो यस्य तद्वाचिनः शब्दात् परा या तृतीया विभक्तिरकर्तरि तदन्ताद् वा तसिः प्रत्ययो भवति। वृत्तेन हीयते वृत्ततो हीयते। चारित्रेण हीयते चारित्रतो हीयते। पापयोगात् – वृत्तेन पापः वृत्ततः पापः। चारित्रेण पापः चारित्रतः पापः।

क्षेपस्य च अविवक्षायां [8]तत्त्वाख्यायामिदमुदाहरणम्। क्षेपे हि पूर्वेणैव सिद्धम्[9]। अकर्तरि इत्येव, देवदत्तेन हीयते[10]॥

## षष्ठ्या व्याश्रये। (४८/२११५)

नानापक्षसमाश्रयो व्याश्रयः। व्याश्रये गम्यमाने षष्ठ्यन्ताद् वा तसिः प्रत्ययो भवति। देवा अर्जुनतोऽभवन्। आदित्याः कर्णतोऽभवन्। षष्ठी चात्र पक्षापेक्षैव। अर्जुनस्य पक्षे, कर्णस्य पक्षे इत्यर्थः। व्याश्रये इति किम्? वृक्षस्य शाखा॥

## रोगाच्चापनयने। (४९/२११६)

रोगो व्याधिः। तद्वाचिनः [11]शब्दाद् या षष्ठी विभक्तिः, तदन्ताद् वा तसिः प्रत्ययो भवति अपनयने गम्यमाने। अपनयनं प्रतीकारः। चिकित्सा इत्यर्थः। प्रवाहिकातः कुरु[12]। कासतः कुरु। छर्दिकातः कुरु। प्रतीकारमस्याः कुरु इत्यर्थः। अपनयने इति किम्? प्रवाहिकायाः प्रकोपनं कुरु॥

---

1. स्वार्थे इत्यधिकम् ड. 2. वृत्तेन अतिक्रम्य वर्तते क. 3. उदाहरणमिदं नास्ति क. 4. सुष्ठुन्यायेनातिक्रम्य गृह्यते इत्यर्थः क. 5. वृत्तेन नास्ति फ. 6. उदाहरणमिदं नास्ति फ. 7. अतिग्रहादिषु इति किम्? वृत्तेन भिन्नः देवदत्तेनातिगृहीतो यज्ञदत्तः। देवदत्तेन क्षिप्तः यज्ञदत्तः। तृतीयायाः इति किम्? वृत्तेन भिन्नं देवदत्तमतिगृह्णाति इत्यधिकम् ड. 8. तत्त्वाख्याने ब. ड. फ. ह. 9. स्यात् इत्यधिकम् फ, सिद्धत्वात् क. 10. हीयमानपापयोगात् इति किम्? वृत्तेन भिन्नः। तृतीयायाः इति किम्? देवदत्तं जहाति ग्रामे हीयते। ग्रामे पापः इत्यधिकम् ड. 11. प्रातिपदिकात् परा क. ह, परा ड. 12. प्रतिकारं कुरु इत्यर्थः इत्यधिकम् ब. ड. क.